प्रवेश सं० १८२०२ विषय: पुराणोतिहासम् क्रम सं०

नाम फाल्गुनशुक्लामर्दकी माहात्म्यम् ग्रन्थकार
(ब्रह्माण्डे)

पत्र सं० १-३ ।

श्लोक सं० — अक्षर सं० (पंक्तौ) ४० पंक्ति सं० (पृष्ठे) १०

आकार: ८.८" x ४.३" लिपि: दे.ना. आधार: का.

वि० विवरणम् पू०

14507

पी० एस० यू० पी०—११ एस० सी० ई०—१९५१—५०,०००

ना. ३८१६

Indira Gandhi National Centre for the Arts

॥अथ शालग्रामदानं॥ शालग्रामशिलाचक्रं योददाद्दानमुत्तमं॥ भूचक्रं तेन दत्तं स्यात्सशैलवनकाननं॥१॥
॥अथ प्रयोगः॥ देशकालौ स्मृत्वा इमां शालग्रामशिलां विष्णुदेवतां सिंहासनघंटासुवर्णछत्रारात्रिकस्नो
नीयपात्रचामरवितानतूलिकोपधानसहितां सशैलभूचक्रदानसमफलावाप्तये अमुकगोत्र अमुकश
र्माहं अमुकगोत्राय अमुकशर्मणे ब्राह्मणाय दातुमहमुत्सृजे तेन पापहा महाविष्णुः प्रीयतां न मम। अत्र
दानवाक्यानि। महाकोशनिवासेन चक्राद्येकरूपशोभिना॥ अस्य देवस्य दानेन मम संतु मनोरथाः॥१॥
शंखः शुभकरो नित्यं सर्वमंगलदायकः॥ तस्माद्दस्य प्रदानेन मम संतु मनोरथाः॥२॥ घंटा देवप्रिया नित्यं
महानंदकरी शुभा॥ संप्रदानेन मे तस्याः शांतिरस्तु सदा मम॥३॥ नारायण जगन्नाथ श्रीपते गरुडध्वज
तव मूर्तिप्रदानेन प्रसन्नो भव सर्वदा॥४॥ इति

Indira Gandhi National
Centre for the Arts

फा॰शु॰ ॥श्रीगणेशाय नमः॥ मांधातोवाच॥ ॥आमर्दकीव्रतं ब्रूहि महापातकनाशनं।सरहस्यं मुनिश्रेष्ठ॥ सहस्रफल
१ प्रदं॥१॥ वशिष्ठ उवाच॥ ॥अत्रैवोदाहरंतीममितिहासं पुरातनं।यथा मुक्तिमनुप्राप्तो व्याधो हिंसासमन्वितः॥२॥
वैदिशं नाम नगरं हृष्टपुष्टजनाकुलं।ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैश्च समलंकृतं॥३॥ रुचिरं चंद्रशार्दूल ब्रह्मघोष
निनादितं।न नास्तिको न दुर्वृत्तो तस्मिन् पुरवरे सदा॥४॥ तत्र सोमान्वयो राजा विख्यातः शशविंदुकः॥ राजा चैत्र
३३ रथो नाम धर्मात्मा सत्यसंगरः॥५॥ नागायुतबलः श्रीमान् शास्त्रशास्त्रार्थपारगः॥ तस्मिन् शासति धर्मज्ञे धर्मात्मनि
धरां प्रभो॥६॥ दरिद्रो नैव कुत्रापि दृश्यते नैव निर्द्धनः।सुकालः सोऽसमारोग्यं तस्मिन् राज्ये प्रशासति॥७॥
विष्णुभक्तिरता लोकास्तस्मिन् पुरवरे सति।हरिपूजारतास्सर्वे राजा वापि विशेषतः॥८॥ न शूद्रो न च कश्चिच्च
द्वादश्यां भुंजते जनाः।सर्वे धर्मानपरित्यज्य हरिभक्तिपरायणाः॥९॥ एवं संवत्सरा जग्मुर्बहवो जनसत्तमा।त्र
तस्य सोमस्य युक्तस्य हरिधर्मरतस्य च॥१०॥ अथ कालेन संप्राप्ता द्वादशी पुष्यसंयुता।फाल्गुनस्य सिते पक्षे ना एम॰
म्नामर्दकी स्मृता॥११॥ तामवाप्य नृपाः सर्वे सबालस्थविरा सदा॥ नियमं चोपवासस्य सर्वे चक्रुर्नराः प्रभो। १

सुवर्णनिर्मितपरशुरामप्रतिमासहितं

महाफलं व्रतं ज्ञात्वा स्नानं कृत्वा बहिर्जले॥१२॥ तत्र देवालये राजा लोकाश्चापि महोत्तमाः।पूर्णकुंभं नवं स्थाप्य
छत्रोपानहसंयुतं॥१३॥ पंचरत्नसमायुक्तं दिव्यगंधाधिवासितं।दीपमालान्वितं चैव जामदग्न्यसमं॥१४॥ जाम समन्वितं
दग्न्यं नमस्कृत्य रेणुकानंदवर्द्धनं। आमर्दकीकृतच्छाय भुक्तिमुक्तिवरप्रद॥१५॥ धात्रितनुसमुद्भूते सर्वपातक
नाशिनी॥ आमलकि नमस्तुभ्यं गृहाणार्घोदकं मम॥१६॥ धात्रिब्रह्मस्वरूपासि रामेण त्वं प्रपूजिता।त्वनपाप्र
दक्षिणा सर्वपापहा भव॥१७॥ तत्र जागरणं चक्रुर्जनाः सर्वे स्वशक्तितः।एतस्मिन्नेव काले तु व्याधः स्वस्थानमा
गतः॥१८॥ क्षुधाश्रमपरिश्रान्तो भाराक्रांतैः स्वसन्निवा। सप्राप्तो मलदिग्धांगो महाभारनायोदितः॥१९॥ कुं
टुंबार्थं जीवघाती सर्वधर्मबहिःकृतः।जागरं तत्र सोपश्यदामर्दक्यां सुखान्वितः॥२०॥ दीपमालाकुलं दृष्ट्वात
त्रैव निषसाद सः।किमेतदिति संचिंत्य प्राप्तो विस्मयतां भृशं॥२१॥ ददर्श कुंभं तत्रस्थं देवं दामोदरं तथा। ददर्शा
मलकीवृक्षं तं तत्रस्थांश्च दीपकान्॥२२॥ वेदमंत्रं च तथाख्यानं सुश्राव पठतां नृणां। एकादश्याश्च माहात्म्यं
सुश्राव क्षुधितोपि सन्॥२३॥ जाग्रतस्तस्य सा रात्रिर्गता विस्मयचेतसः।ततः प्रभाते समये विविशुर्नगरं जनाः॥२४॥

जागरस्य सुवर्णजं

Indira Gandhi National
Centre for the Arts

फा॰भु॰ आषोपि गृहमागत्य बुभुजे प्रीतमानसः। ततः काले न महता व्याधः पंचत्वमागतः॥२५॥ एकादश्याः प्रभावेन रात्रौ
२ जागरणस्य चाराज्यं प्रपेदे सुमहच्चतुरंगबलान्वितं॥२६॥ जयंती नाम नगरी तत्र राजा विदूरथः॥ तस्मात्स तनयो
पत्नेनास्य वसुरथो बली॥२७॥ चतुरंगबलोपेतो धनधान्यसमन्वितः। दशग्रामाणि ग्रामाणां बुभुजे मपवर्जि
२४ तः॥२८॥ तेजसादित्यसदृशः कीर्त्या चंद्रसमप्रभः। पराक्रमे विष्णुसमः क्षमया पृथिवीसमः॥२९॥ धार्मिकः
सत्यवादी च विष्णुभक्तिपरायणः। ब्रह्मज्ञः सत्यसंधश्च प्रजापालनतत्परः॥३०॥ यजते विविधान् यज्ञान् स
राजा परदर्पहा। दानानि विविधान्यानि प्रददाति च सर्वदा॥३१॥ एकदा मृगयां यातो दैवान्मार्गपरिच्युतः। न
दिशां नैव विदिशं वेत्ति तत्र महीपतिः॥३२॥ अपश्यत्स परिश्रान्तो न्यग्रोधं शाखिनां वरं। तस्य छायां समाश्रि
त्य सुष्वाप स महीपतिः॥३३॥ उपधाय तरोर्मूले मे काकी संहते वने। अत्रांतरे म्लेच्छगणाः पर्वतोत्तरवासभा
क्॥३४॥ आययौ तत्र यत्रास्ते राजा परबलार्दनः। कृतवैरास्ततो राज्ञा सर्वे देवोपतापिताः॥३५॥ पूर्ववैरं तु राम॰
तन्मूर्धानं भूरिदक्षिणां हन्यतामिति वा चुक्तं निजवैरानिरोधकृत॥३६॥ अनेन निहताः सर्वे पितरो भ्रातरः २

सुताः। पौत्राः स्वस्वभागिनेयाश्च मातुलाश्च निपातिताः॥३७॥ निर्वासिताश्च स्वस्थानात् विदिशाश्च दिशो दश एता
वद्दुःखार्तसर्वे तं नृपं हंतुमुद्यताः॥३८॥ पाशैश्च पट्टिशैः खड्गैः बाणैर्धनुषि संधितैः। सर्वतो म्लेच्छगणास्ते च राजानं
हंतुमुद्यताः॥३९॥ सर्वाणि शस्त्राण्यस्त्राणि समाद्रवंति न वै शरीरं प्रविशंति तस्य। ते चापि सर्वे हतसत्त्वसंघा म्लेच्छा
बभूवुर्गतदेहजीवाः॥४०॥ यदापि चालितुं न त्र न शेकुस्ते [illegible] शस्त्राणि कुंठितान्येव सर्वेषां गतचेतसां॥
४१॥ दीनाश्च बभूवुस्ते सर्वे ये तं हंतुं समागताः। एतस्मिन्नेव काले तु तस्य राज्ञः शरीरतः॥४२॥ निःसृता प्रमदा चैका
सर्वाभरणभूषिता। दिव्यगंधसमायुक्ता दिव्यांबरविभूषिता॥४३॥ दिव्यमाल्यांबरधरा भृकुटीकुटिलानना॥
साच स्फुलिंगानग्नेर्वाप्यं वमंती पावकं ज्वलं॥४४॥ चक्रोपतत्र तत्रैव कालरात्रिरिवापरा। अभ्यधावत्सुसंकु
द्धा म्लेच्छान् समंततः दुःसहा॥४५॥ निहता स्वतया दैत्या म्लेच्छा वा कर्मरतास्तया। ततो राजा विबुद्धः सन् ददर्श मह
दद्भुतं॥४६॥ हतान् म्लेच्छगणान् दृष्ट्वा राजा चिंतामवाप सः। केनेह ताम्लेच्छा [illegible] वैरिणो मम॥४७॥

Indira Gandhi National
Centre for the Arts

फा·शु·

केनेदं च महत्कर्म कृतमस्मद्धितार्थिना। एतस्मिन्नेव काले च वागुवाचाशरीरिणी॥४८॥ नैस्थितं नृपसिंह ह्यानिः कापि
३ विस्मयाचिंतां आरण्यकेशा वादन्मोनास्तिकोपि हितीपकः॥४९॥ वनान्तस्मात्स कुशली समायातोपि भूमिभुक्।
राज्यं च कारयामास धर्मेण यो देवतेशवत्॥५०॥ वशिष्ठ उवाच॥ आमर्दकीव्रतं राजन् नृपे कुर्वंति नरोत्तमाः। नेयान्ति
३५ वैष्णवे लोके नात्र कार्या विचारणा॥५१॥ इति श्रीब्रह्माण्डपुराणे आमर्दकीमाहात्म्ये फाल्गुनीशुक्ला समाप्ता

गम०
३

Indira Gandhi National Centre for the Arts